श्रीमद् भागवत का यह सार
भगवद् भक्ति ही आधार

# श्रीमद्भागवत रसिक कुटुंब

## UG-11.18- चतुर्थ सोपान



स्व धाम प्रस्थान को देखो हो रहे श्री कृष्ण तैयार।
उद्धृत किए उद्धव समक्ष अद्भुत अनमोल उद्गार।।

**नारायणं(न्) नमस्कृत्य, नरं(ञ्) चैव नरोत्तमम्।**
**देवीं(म्) सरस्वतीं(वँ) व्यासं(न्), ततो जयमुदीरयेत्॥**

**नामसङ्कीर्तनं(यँ) यस्य, सर्वपापप्रणाशनम्।**
**प्रणामो दुःखशमनस्, तं(न्) नमामि हरिं(म्) परम्॥**

**श्रीमद्भागवतमहापुराणम्**

**एकादशः स्कन्धः**

**॥ अथ अष्टादशोऽध्यायः ॥**

### श्रीभगवानुवाच

**वनं(वँ) विविक्षुः(फ्) पुत्रेषु, भार्यां(न्) न्यस्य सहैव वा ।**
**वन एव वसेच्छान्तस्- तृतीयं(म्) भागमायुषः ॥ 1॥**

वसेच्+छान्+तस्

**कन्दमूलफलैर्वन्यैर्- मेध्यैर्वृत्तिं(म्) प्रकल्पयेत् ।**
**वसीत वल्कलं(वँ) वासस्-तृणपर्णाजिनानि च ॥ 2॥**

कन्दमूल+फलैर्+वन्यैर् , मेध्यैर्+वृत्तिं , तृण+पर्णा+जिनानि

केशरोमनखश्मश्रु-मलानि बिभृयाद् दतः ।
न धावेदप्सु मज्जेत, त्रिकालं(म्) स्थण्डिलेशयः ॥ 3॥

केशरो+ मनखश्+मश्रु

ग्रीष्मे तप्येत पं(ञ्)चाग्नीन् , वर्षास्वासारषाड्जले ।
आकण्ठमग्नः(श्) शिशिरे, एवं(वँ)वृत्तस्तपश्चरेत् ॥ 4॥

पं(ञ्)+चाग् +नीन् ,वर्षास्+वासा+रषाड्+ जले

एवं(वँ)+वृत्तस्+तपश्+चरेत्

अग्निपक्वं(म्) समश्नीयात्, कालपक्वमथापि वा ।
उलूखलाश्मकुट्टो वा, दन्तोलूखल एव वा ॥ 5॥

समश्+नीयात् ,

उलूखलाश्+ मकुट्+टो

स्वयं(म्) सं(ञ्)चिनुयात् सर्व- मात्मनो वृत्तिकारणम् ।
देशकालबलाभिज्ञो, नाददीतान्यदाऽऽहृतम् ॥ 6॥

नाददीतान्+यदाऽऽहृतम्

वन्यैश्चरुपुरोडाशैर्- निर्वपेत् कालचोदितान् ।
न तु श्रौतेन पशुना, मां(यँ) यजेत वनाश्रमी ॥ 7॥

वन्यैश् + चरुपुरो+ डाशैर् , कालचो+ दितान्

अग्निहोत्रं(ञ्) च दर्शश्च, पूर्णमासश्च पूर्ववत् ।
चातुर्मास्यानि च मुने- राम्नातानि च नैगमैः ॥ 8॥

चातुर् + मास्यानि, राम्+ नातानि

एवं(ञ्) चीर्णेन तपसा, मुनिर्धमनिसन्ततः ।
मां(न्) तपोमयमाराध्य, ऋषिलोकादुपैति माम् ॥ 9॥

मुनिर्+धम+निसन्+ततः

यस्त्वेतत् कृच्छ्रतश्चीर्णं(न्), तपो निः(श्)श्रेयसं(म्) महत् ।
कामायाल्पीयसे युञ्ज्याद्, बालिशः(ख्) कोऽपरस्ततः||10||

यस्+त्वेतत् ,कृच्छ्र+तश्+चीर्णं

यदासौ नियमेऽकल्पो, जरया जातवेपथुः ।
आत्मन्यग्नीन् समारोप्य, मच्चित्तोऽग्निं(म्) समाविशेत् ॥ 11॥

आत्मन्+यग्+नीन्

यदा कर्मविपाकेषु , लोकेषु निरयात्मसु ।
विरागो जायते सम्यङ्, न्यस्ताग्निः(फ्) प्रव्रजेत्ततः ॥ 12॥

प्रव्रजेत्+ततः

इष्ट्वा यथोपदेशं(म्) मां(न्), दत्त्वा सर्वस्वमृत्विजे ।
अग्नीन् स्वप्राण आवेश्य, निरपेक्षः(फ्) परिव्रजेत् ॥13॥

सर्वस्व+मृत्विजे

विप्रस्य वै सं(न्)न्यसतो, देवा दारादिरूपिणः ।
विघ्नान् कुर्वन्त्ययं(म्) ह्यस्मा- नाक्रम्य समियात् परम् ॥ 14॥

कुर्वन्+ त्ययं(म्)

बिभृयाच्चेन्मुनिर्वासः(ख्), कौपीनाच्छादनं(म्) परम् ।
त्यक्तं(न्) न दण्डपात्राभ्या- मन्यत् किं(ञ्)चिदनापदि ॥ 15॥

बिभृयाच्+चेन्मुनिर् + वासः(ख्)

दृष्टिपूतं(न्) न्यसेत् पादं(वँ),वस्त्रपूतं(म्) पिबेज्जलम् ।
सत्यपूतां(वँ) वदेद् वाचं(म्),मनः(फ्)पूतं(म्) समाचरेत् ॥ 16॥

पिबेज् +जलम्

मौनानीहानिलायामा, दण्डा वाग्देहचेतसाम् ।
न ह्येते यस्य सन्त्यं(ङ्)ग, वेणुभिर्न भवेद् यतिः ॥ 17॥

मौनानी+हानिला+ यामा ,सन्+त्यं(ङ्)ग

भिक्षां(ञ्) चतुर्षु वर्णेषु, विगर्ह्यान् वर्जयं(म्)श्चरेत् ।

सप्तागारानसं(ङ्)क्लृप्तां(म्)स्- तुष्येल्लब्धेन तावता ॥ 18॥

विगर्+ह्यान् , सप्तागारा+नसं(ङ्)क्लृप्+तां(म्)स्

तुष्येल् +लब्+धेन

बहिर्जलाशयं(ङ्) गत्वा, तत्रोपस्पृश्य वाग्यतः ।

विभज्य पावितं(म्) शेषं(म्), भुं(ञ्)जीताशेषमाहृतम् ॥ 19॥

तत्रोपस्+पृश्य , भुं(ञ्)जीता+शेषमा+ हृतम्

एकश्चरेन्महीमेतां(न्),निः(स्)सं(ङ्)गः(स्) सं(यँ)यतेन्द्रियः ।

आत्मक्रीड आत्मरत, आत्मवान् समदर्शनः ॥ 20॥

एकश्+चरेन्+महीमेतां

विविक्तक्षेमशरणो, मद्भावविमलाशयः ।

आत्मानं(ञ्) चिन्तयेदेक-मभेदेन मया मुनिः ॥ 21॥

विविक्तक्षे+ मशरणो

अन्वीक्षेतात्मनो बन्धं(म्), मोक्षं(ञ्) च ज्ञाननिष्ठया ।

बन्ध इन्द्रियविक्षेपो, मोक्ष एषां(ञ्) च सं(यँ)यमः ॥ 22॥

अन्वीक्षे+ तात्मनो

तस्मान्नियम्य षड्वर्गं(म्), मद्भावेन चरेन्मुनिः ।

विरक्तः(ह) क्षुल्लकामेभ्यो, लब्ध्वाऽऽत्मनि सुखं(म्) महत् ॥ 23॥

तस्मान्+नियम्य

पुरग्रामव्रजान् सार्थान्, भिक्षार्थं(म्) प्रविशं(वँ)श्चरेत् ।

पुण्यदेशसरिच्छैल-वनाश्रमवतीं(म्) महीम् ॥ 24॥

पुण्यदेश+सरिच्+छैल

वानप्रस्थाश्रमपदेष्- वभीक्ष्णं(म्) भैक्ष्यमाचरेत् ।

सं(म्)सिध्यत्याश्वसं(म्)मोहः(श्),शुद्धसत्त्वः(श्) शिलान्धसा ॥ 25॥

वानप्रस्था+ श्रमपदेष् , सं(म्)सिध्यत्+याश्+ वसं(म्)मोहः(श्)

नैतद् वस्तुतया पश्येद्, दृश्यमानं(वँ) विनश्यति ।

असक्तचित्तो विरमे-दिहामुत्र चिकीर्षितात् ॥ 26॥

चिकीर् + षितात्

यदेतदात्मनि जगन्-मनोवाक्प्राणसं(म्)हतम् ।

सर्वं(म्) मायेति तर्केण, स्वस्थस्त्यक्त्वा न तत् स्मरेत् ॥ 27॥

यदे+तदात्मनि,

मनोवाक्+प्राण+सं(म्)हतम् , स्वस्थस्+त्यक्त्वा

ज्ञाननिष्ठो विरक्तो वा, मद्भक्तो वानपेक्षकः ।

सलिं(ङ्)गानाश्रमां(म्)स्त्यक्त्वा, चरेदविधिगोचरः ॥ 28॥

सलिं(ङ्)गाना+श्रमां(म्)स्+त्यक्त्वा

बुधो बालकवत् क्रीडेत्, कुशलो जडवच्चरेत् ।

वदेदुन्मत्तवद् विद्वान्, गोचर्यां(न्) नैगमश्चरेत् ॥ 29॥

वदेदुन्+मत्+ तवद्

वेदवादरतो न स्यान्- न पाखण्डी न हैतुकः ।

शुष्कवादविवादे न, कं(ञ्)चित् पक्षं(म्) समाश्रयेत् ॥ 30॥

शुष्कवा+ दविवादे

नोद्विजेत जनाद् धीरो, जनं(ञ्) चोद्वेजयेन्न तु ।

अतिवादां(म्)स्तितिक्षेत, नावमन्येत कं(ञ्)चन ।

देहमुद्दिश्य पशुवद्, वैरं(ङ्) कुर्यान्न केनचित् ॥ 31॥

चोद्+वेजयेन्+न, अतिवादां(म्)स्+तितिक्षेत

एक एव परो ह्यात्मा, भूतेष्वात्मन्यवस्थितः ।

यथेन्दुरुदपात्रेषु, भूतान्येकात्मकानि च ॥ 32॥

भूतेष्वात्+मन्य+वस्थितः, यथेन्+दुरु+ दपात्रेषु

भूतान्ये+कात्+ मकानि

अलब्ध्वा न विषीदेत, काले कालेऽशनं(ङ्)क्वचित् ।

लब्ध्वा न हृष्येद् धृतिमा- नुभयं(न्) दैवतन्त्रितम् ॥ 33॥

दैवतन् + त्रितम्

आहारार्थं(म्) समीहेत, युक्तं(न्) तत् प्राणधारणम् ।

तत्त्वं(वँ) विमृश्यते तेन, तद् विज्ञाय विमुच्यते ॥ 34॥

यदृच्छयोपपन्नान्न-मद्याच्छ्रेष्ठमुतापरम् ।

तथा वासस्तथा शय्यां(म्),प्राप्तं(म्) प्राप्तं(म्) भजेन्मुनिः ॥ 35॥

यदृच्छयो+पपन्+नान्+न ,

मद्याच्+छ्रेष्ठ+मुतापरम्

शौचमाचमनं(म्) स्नानं(न्), न तु चोदनया चरेत् ।

अन्यां(म्)श्च नियमान् ज्ञानी, यथाहं(लँ) लीलयेश्वरः ॥ 36॥

शौचमा+ चमनं(म्)

न हि तस्य विकल्पाख्या, या च मद्वीक्षया हता ।

आदेहान्तात् क्वचित् ख्यातिस् -ततः(स्) सम्पद्यते मया ॥ 37॥

मद्+वीक्षया ,आदेहान्+तात्

दुःखोदर्केषु कामेषु, जातनिर्वेद आत्मवान् ।

अजिज्ञासितमद्धर्मो, गुरुं(म्) मुनिमुपव्रजेत् ॥ 38॥

अजिज्ञा+सितमद्+धर्मो

तावत् परिचरेद् भक्तः(श्),श्रद्धावाननसूयकः ।

यावद् ब्रह्म विजानीयान्-मामेव गुरुमादृतः ॥ 39॥

श्रद्धावा+ ननसूयकः

यस्त्वसं(यँ)यतषड्वर्गः(फ्), प्रचण्डेन्द्रियसारथिः ।

ज्ञानवैराग्यरहितस्- त्रिदण्डमुपजीवति ॥ 40॥

यस्त्व+सं(यँ)यत+ षड्वर्गः(फ्)

प्रचण्डेन्+द्रिय+सारथिः, त्रिदण्ड+मुप+जीवति

सुरानात्मानमात्मस्थं(न्), निह्नुते मां(ञ्)च धर्महा ।

अविपक्वकषायोऽस्मा-दमुष्माच्च विहीयते ॥ 41॥

सुरानात्मा+नमात्+मस्थं(न्), अविपक्+वकषा+ योऽस्मा

भिक्षोर्धर्मः(श्) शमोऽहिं(म्)सा, तप ईक्षा वनौकसः ।

गृहिणो भूतरक्षेज्या, द्विजस्याचार्यसेवनम् ॥ 42॥

भिक्षोर्+धर्मः(श्), भूत+ रक्षेज्या,

द्विजस्+याचार्+यसेवनम्

ब्रह्मचर्यं(न्) तपः(श्) शौचं(म्),सन्तोषो भूतसौहृदम् ।

गृहस्थस्याप्यृतौ गन्तुः(स्), सर्वेषां(म्) मदुपासनम् ॥ 43॥

गृहस्थस्+याप्+यृतौ

इति मां(यँ) यः(स्) स्वधर्मेण, भजन् नित्यमनन्यभाक् ।

सर्वभूतेषु मद्भावो, मद्भक्तिं(वँ) विन्दते दृढाम् ॥ 44॥

नित्य+मनन्य+भाक्

भक्त्योद्धवानपायिन्या, सर्वलोकमहेश्वरम् ।

सर्वोत्पत्त्यप्ययं(म्) ब्रह्म, कारणं(म्) मोपयाति सः ॥ 45॥

भक्त्योद्+धवा+नपायिन्या, सर्वोत्+पत्त्यप्+ययं

इति स्वधर्मनिर्णिक्त- सत्त्वो निर्ज्ञातमद्गतिः ।

ज्ञानविज्ञानसम्पन्नो, नचिरात् समुपैति माम् ॥ 46॥

स्वधर्म+निर्णिक्त ,निर्ज्ञा+तमद्+गतिः, ज्ञानविज्ञा+ नसम्पन्नो

वर्णाश्रमवतां(न्) धर्म, एष आचारलक्षणः ।

स एव मद्भक्तियुतो, निः(श्)श्रेयसकरः(फ्) परः ॥ 47॥

वर्णाश्र+मवतां(न्), आचा+रलक्षणः

एतत्तेऽभिहितं(म्) साधो, भवान् पृच्छति यच्च माम् ।

यथा स्वधर्मसं(यँ)युक्तो, भक्तो मां(म्) समियात् परम् ॥ 48॥

एतत्+ तेऽभिहितं(म्)

इति श्रीमद्भागवते महापुराणे पारमहं(म्)स्यां(म्)

सं(म्)हितायां(म्) एकादशस्कन्धे अष्टादशोऽध्यायः ॥ 18॥

ॐ पूर्णमदः(फ्) पूर्णमिदं(म्) पूर्णात्पूर्णमुदच्यते

पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ॥

ॐ शान्तिः(श्)शान्तिः(श्)शान्तिः ॥

